<u>लेखनाय प्रयुक्ताः सामग्र्यः</u>

लेखनं द्विधा भवति यथा ताड़पत्रभूर्जपत्रवस्त्रकागदादिषु मसिना लेखनम् । तथा च ताम्रपत्रस्वर्णपत्रईष्टिपाषाणशिलादिषु उत्कीर्णनम् । तत्र भारते प्रसिद्धशब्दः 'स्याही' तस्य कृते संस्कृते मसि अथवा मसी इति प्रयोगः भवति । मसिशब्दः नहि केवलं इंक (Ink) मात्रं बोधयति अपितु नाना वस्तूनां पेषणं कृत्वा सिद्धं भवति स्म । यथा- अङ्गारम् पेषणं कृत्वा तत्र अङ्कम् (गोद) शर्करां च मिश्रीकृत्य निर्मितं भवति स्म । बाणः (प्रायः ६२०ईस्वी) मध्ये तथा तस्य पूर्ववर्ती सुबंधुरपि (हर्षचरितम् वासवदत्ता) इत्यनयोःपुस्तकयोर्मध्ये मषिशब्दस्य प्रयोगं करोति स्म । मसि स्थापनाय या लघुपात्रं भवति स्म तस्य कृते मेलामन्दा, मेलान्धुः, मेलान्धुका, मसिमणि इत्यादीनां शब्दानां प्रयोगः भवति स्म । पुराणेषु मसिपात्रम्, मसिभाण्डम् मसिकूपिका इत्यादयः शब्दाः प्राप्यन्ते । अन्धेरस्तूपस्य अस्थिमञ्जूषायां (ईसापूर्वद्वितीयशताब्द्याम् ) धातूनामुपरि कलशानामुपरि च लेखनस्य प्राचीनमुदाहरणं प्राप्तं भवति । मषि इत्यस्य प्रयोगः खोतानतः प्राप्तासु प्रथमशताब्द्याः ईसापूर्वस्य हस्तलिपिषु बहुधा उपलब्धाः भवन्ति । कृष्णामषिः - (रोशनाई) एतदतिरिक्तमपि रक्तमसि, पीतमसि इत्यादीनामपि प्रयोगः प्राप्यते । स्वर्णमसि तथा च रजतमसि इत्यस्यापि प्रयोगः प्राप्यते । अजमेरसंग्रहालये सुन्दराक्षरैः लिखितमेकं कल्पसूत्रमपि प्राप्यते । यस्य प्रथमं पत्रं सुवर्णमसिना लिखितमस्ति । इदं पुस्तकं सप्तदशशताब्द्यां लिखितमासीत् ।

**लेखनाय सामान्यतया-**

लेखनी इत्यस्य प्रयोगः भवति। तत्र तूलिका (पेंसिल) कूर्चः, नरकटः तथा काष्ठलेखनी, रजतलेखनीस स्वर्णलेखनी इत्यादयः भेदाः सन्ति । ललितविस्तरग्रन्थे वर्णक इति पदं विद्यते तस्य तात्पर्यं भवति यत् एकं सरलं काष्ठखण्डम् । दशकुमारचिरतनामके पुस्तके लेखनी निमित्तं वर्णवर्तिका इत्यस्य प्रयोगः प्राप्यते । यस्यार्थः सम्भवतः चित्रविचित्रा तूलिका (पेंसिल) भवति । एतदतिरिक्तमपि तूली, तूलिका, शलाका इत्यादयः शब्दाः अपि प्राप्ताः भवन्ति । यूनानीशब्दस्य कलम इत्यस्य अरबीमाध्यमेन प्रचारः अभवत् । नरकटस्य बंशस्य तथा च काष्ठखण्डस्य निर्मिता लेखनी भवति स्म । यया लेखनं भवति स्म । उत्तरभारते ताड़पत्रे लेखनार्थं मसेः प्रयोगः भवति स्म । ताड़पत्राणि आदौ यन्त्रविद्धानि भवन्ति स्म । दक्षिणशैल्या तु सूच्या प्रभावं (दबाकर) कृत्वा निर्मिता या अक्षरावली सा पुस्तकं भवति स्म । अस्य कालः पञ्चदशशताब्दी भवतीति । परन्तु इदृशं पुस्तकं वातावरणकारणात् शीघ्रं नष्टं भवति स्म ।

**उत्तकीर्णनार्थं सामग्र्यः –**

ताम्रपत्रे सर्वप्रथमं मसिना एव उट्टंकनं भवति स्म । तदनन्तरं तमक्षरमधिकृत्य स्वर्णकाराः, लौहकाराः वा तक्षण्या (छेनी) उत्कीर्णनं कुर्वन्ति स्म । यदा कदा कलाकृतिं वर्धयितुमपि यन्त्राणां प्रयोगः भवति स्म । वस्तुतः कठोरपाषाणधातुषु वा लेखनार्थं

कुन्तस्य, तीक्षण्याः, इत्यादीनां प्रयोगः भवति स्म। शिलालेखादिषु लेखनार्थं आदौ पाषाणादिषु सम्यग्भावेन समतलं कृत्वा लेखनं भवति स्म। उत्कीर्णनात् प्राग् आदौ लेखकः कविर्वा स्वकीयं सुन्दरं भावं प्रस्तुतं करोति स्म। तदनन्तरं अन्यः लेखकः तमेव भावं स्वसुन्दरलेखन्या लिखति स्म। लेखानां पङ्क्तिमं सरलं स्थापनार्थं आदौ रेखां कर्षयित्वा तदनन्तरमुत्कीर्णनं भवति स्म। लेखने पाषाणखण्डानि नष्टानि अपि भवन्ति स्म तदा तं पूरयितुं धातूनां प्रयोगः भवति स्म।

-- By Sanjoy Barman